**संस्कृतवार्ता:**

**दिनाङ्क :-18.08.2025**

**प्रात: - 06:55**

**<u>एनडीए उपराष्ट्रपतिः :</u>**

आगामि-उपराष्ट्रपति-निर्वाचनार्थं महाराष्ट्रस्य राज्यपालः सी.पी. राधाकृष्णन-वर्यः राष्ट्रिय-लोकतांत्रिक-घटबन्धनस्य प्रत्याशी भविष्यति। भाजपा-दलस्य राष्ट्राध्यक्षः केन्द्रीयमन्त्री जे.पी.नड्डा गतसायं, नवदिल्लीनगरे, संसदीयमण्डलस्य संगोष्ठ्याः अनन्तरं वार्ताहरान् सम्बोधयन् इमां घोषणां कृतवान् । सः अवदत् यत्, राष्ट्रियलोकतांत्रिक-घटबन्धनस्य (NDA) सर्वे घटक-दलानां सदस्याः अस्य निर्णयस्य समर्थनं कृतवन्तः।

अवधेयं यत् उपराष्ट्रपति-पदस्य निर्वाचनं सप्टेम्बर-मासस्य नवम-दिनाङ्के भविष्यति। श्रीजगदीप-धनखडस्य त्यागपत्रस्य कारणेन निर्वाचनं आवश्यकं अभवत्।

**<u>प्रधानमन्त्री नरेन्द्रमोदी</u>:**

एतन्मध्ये प्रधानमन्त्री नरेन्द्रमोदी अस्य निर्णयस्य स्वागतं कृतवान् । सोशल मीडिया सन्देशे श्रीमोदिना प्रकाशितं, यत् दीर्घकालिक-सार्वजनिकजीवने राधाकृष्णनमहोदयः स्वस्य समर्पणेन, विनयेन, बुद्ध्या च विशिष्टः अभवत्। प्रधानमन्त्रिणा अग्रे विश्वासः प्रकटितः यत् राधाकृष्णनमहोदयः प्रेरणादायकः उपराष्ट्रपतिः भविष्यति । सूचनाप्रसारणमन्त्री श्रीअश्विनीवैष्णवः अपि राधाकृष्णन-महोदयाय, उपराष्ट्रपतिपदस्य प्रत्याशीरूपेण, एनडीए-घटबन्धनपक्षतः नामाङ्कनाय अभिनन्दनं कृतवान् ।

**<u>प्रधानमन्त्री-दिल्ली</u>:**

प्रधानमन्त्री श्रीनरेन्द्रमोदी 'वोकल फ़ॉर् लोकल' इत्यस्योपरि बलं दत्तवान् अथ भारते निर्मितानाम् उत्पादानाम् उपरि विश्वासं कर्तुम्, तेषां क्रयणं च कर्तुं जनान् निवेदितवान् ।

श्रीमोदी ह्यः देहल्यां, प्रायः एकादश-सहस्रकोटिरूप्यकाणां मूल्यस्य द्वयोः प्रमुखयोः राष्ट्रिय-राजमार्ग-परियोजनानाम् उद्घाटनानन्तरं जनान् सम्बोधयति स्म।

**निर्वाचन-आयोगः**

निर्वाचन-आयोगेन उक्तं यत् सर्वाण्यपि राजनैतिक-दलानि तस्य पुरतः समानानि सन्ति, यतः सः राजनैतिकदलेषु भेदभावं नैव करोति। ह्यः नवदिल्लीनगरे वार्ताहरान् सम्बोधयन् मुख्यनिर्वाचन-आयुक्तः ज्ञानेशकुमारः अवदत्, यत् निर्वाचन-आयोगः कदापि स्वस्य संवैधानिक-कर्तव्यात् न कदापि विमुखी-भविष्यति ।

**विक्रममिश्री-नेपाल-भ्रमणः-**

भारतेन नेपालेन च द्विपक्षीयसहकार्यं गहनं कर्तुं स्वप्रतिबद्धतायाः पुनः पुष्टिः कृता अस्ति। ह्यः दिनद्वयस्य आधिकारिकयात्रायाः कृते नेपालं प्राप्तः विदेशसचिवः विक्रममिश्री, काठमाण्डौ उच्चस्तरीय-संगोष्ठिषु भागं गृहीतवान्।

**ट्रम्प-जेलेन्स्की-मेलनम**

युक्रेनदेशे प्रचलित-युद्धस्य शीघ्रं समाधानार्थं विचारविनिमयार्थम्, अद्य यूक्रेनदेशस्य राष्ट्रपतिः वोलोडिमिर् जेलेन्स्की इत्यनेन सह वाशिंगटननगरे अमेरिकीराष्ट्रपतिना डोनाल्ड ट्रम्पेन सह महत्त्वपूर्ण-संगोष्ठ्याम्, यूरोप-देशानां शीर्षनेतारः सम्मिलिताः भविष्यन्ति।

**चीन विदेशमन्त्री**

चीन-देशस्य विदेशमन्त्री वाङ्ग यी अद्यारभ्य भारतस्य द्विदिवसीययात्रायां भविष्यति । अस्मिन्नवसरे सः भारत-चीनदेशयोः सीमायाः विषये विशेषप्रतिनिधिवार्तायाः चतुर्विंशतितम-गोष्ठीम्, भारतस्य विशेषप्रतिनिधिना श्रीअजित-डोभालेन सह करिष्यति ।

**<u>नीरज चोपड़ा डायमण्डलीगः</u>** -

वर्तमान-विश्वविजेता अथ वारद्वयम् ओलम्पिक-पदकविजेता, नीरज चोपड़ा आधिकारिकतया ऐषमः डायमण्ड् लीग् इत्यस्याम् स्पर्धायाम्, अन्तिमचक्रे स्वस्थानं सुनिश्चितीकृतवान्, इयं प्रतियोगिता अस्मिन् मासे सप्तविंशति-अष्टविंशति दिनांकयोः, स्विट्ज़र्ल्याण्ड्देशस्य ज्यूरिच्-नगरे भविष्यति ।